रेमे सुनिर्ज्जने रम्ये बुबुधे न दिवानिशम् ॥
तयोः कन्या च कालेन राधिका सा बभूव ह ।
दैवात् श्रीदामशापेन श्रीकृष्णस्याज्ञया पुरा ।
अयोनिसम्भवा सा च कृष्णप्राणाधिका सती ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥

वृषभासा, स्त्री, (वृषेण धर्म्मेण भासते इति । भास + अच् । स्त्रियां टाप् ।) अमरावती । इति त्रिकाण्डशेषः ॥

वृषयः, पुं, (वृ + “वृङोः षुगुकौ च ।” उणा० ४ । १०० । इति कयन् षुगागमश्च ।) आश्रयः । इत्युणादिकोषः ॥

वृषलः, पुं, गृञ्जनः । शूद्रः । (यथा, मनौ । ४ । १४० ।
“नाश्नातेन समं गच्छेन्नैको न वृषलैः सह ॥”
अस्य नामनिरुक्तिर्यथा, तत्रैव । ८ । १६ ।
“वृषो हि भगवान् धर्म्मस्तस्य यः कुरुते ह्यलम् ।
वृषलं तं विदुर्द्देवास्तस्माद्धर्म्मं न लोपयेत् ॥”)
चन्द्रगुप्तराजः । वाजी । इति मेदिनी ॥ अधार्म्मिकः । इति जटाधरः ॥

वृषलात्मजः, त्रि, (वृषलस्यात्मजः ।) अधार्म्मिकजातः । इति केचित् ॥ शूद्रोद्भवश्च ॥

वृषली, स्त्री, पितृगृहे अविवाहिता रजस्वला कन्या । यथा । अत्रिकाश्यपौ ।
“पितुर्गेहे च या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥”
इत्युद्वाहतत्त्वम् ॥
स्वपतिं परित्यज्य या परपतिगामिनी । यथा,—
“स्ववृषं या परित्यज्य परवृषे वृषायते ।
वृषली सा हि विज्ञेया न शूद्री वृषली भवेत् ॥”
इति काशीखण्डः ॥
(वृषलस्य भार्य्या । ङीष् ।) शूद्री च ॥ (यथा, महानिर्व्वाणतन्त्रे । १ । ४७ ।
“शूद्रान्नभोजिनः क्रूरा वृषलीरतिकामुकाः ॥”)

वृषलीपतिः, पुं, (वृषल्याः पतिः ।) वृषलीविवाहकर्त्ता । यथा,—
“यस्तु तां वरयेत् कन्यां ब्राह्मणो ज्ञानदुर्ब्बलः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥”
इत्युद्वाहतत्त्वम् ॥
“यदि शूद्रां व्रजेत् विप्रो वृषलीपतिरेव सः ॥”
इति ब्रह्मवैवर्त्तपुराणम् ॥

वृषलोचनः, पुं, (वृषस्य लोचने इव लोचने यस्य ।) मूषिकः । इति हेमचन्द्रः ॥ वृषनयने, स्त्री ॥

वृषवाहनः, पुं, (वृषो वाहनं यस्य ।) शिवः । इति केचित् ॥

वृषशत्रुः, पुं, (वृषस्यासुरविशेषस्य शत्रुः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

वृषसृक्की, [न्] पुं, भङ्गरोलः । इति शब्दमाला ॥

वृषस्यन्ती, स्त्री, (वृषं नरं शुक्रलं वा इच्छति मैथुनाय । वृष + “सुप आत्मनः क्यच् ।” ३ । १ । ८ । इति क्यच् । “अश्वक्षीरेति ।” ७ । १ । ५१ । इति सुगागमः । ततः । “लटः शतृशानचाविति ।” ३ । २ । १२४ । इति शतृ । “उगितश्च ।” ४।१।६ । इति ङीप् ।) कामुकी । इत्यमरः ॥ वृषेण जन्तुमिच्छन्ती गौः । इति व्याकरणम् ॥ तथा च ।
“लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवागमत् ।
मन्मथायुधसम्पातवध्यमानमतिः पुनः ॥”
इति भट्टिः ॥

वृषा, स्त्री, मूषिकपर्णी । इत्यमरः ॥ कपिकच्छूः । इति हेमचन्द्रः ॥

वृषा, [न्] पुं, (वर्षतीति । वृष सेचने + “कनिन् युवृषितक्षीति ।” उणा० १ । १५६ । इति कनिन् ।) इन्द्रः । (यथा, रघुः । १० । ५२ ।
“प्राजापत्योपनीतं तत् अन्नं प्रत्यग्रहीन्नृपः ।
वृषेव पयसां सारमाविष्कृतमुदन्वता ॥”)
कर्णः । वेदनाज्ञानम् । दुःखम् । इति मेदिनी ॥ वृषः । (यथा, ऋग्वेदे । १० । ४३ । ८ ।
“वृषा न क्रुद्धः पतयत् रजःसु ॥”
“रजःसु लोकेषु वृषा न यथा वृषभः क्रुद्धः सन् प्रतिवृषभवधाय पतयन् गच्छति ।” इति तद्भाष्ये सायणः ॥) घोटकः । इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे । ७ । ६८ । १ ।
“आ वां रथो रोदसी बद्बधानो
हिरण्ययो वृषभिर्यात्वश्वैः ॥”
“हे अश्विनौ वां रथो वृषभिः युवभिरश्वैर्युक्तः समायातु ।” इति तद्भाष्ये सायणः ॥ पिता । यथा, ऋग्वेदे । ७ । २० । ५ ।
“वृषा जजान वृषणं रणाय ॥”
“वृषा सेक्ता पिता कश्यपो वृषणं कामानां वर्षितारमिन्द्रम् ।” इति तद्भाष्ये सायणः ॥ त्रि, वर्षकः । यथा, ऋग्वेदे । १० । ६७ । ७ ।
“ब्रह्मणस्पतिर्वृषभिर्वराहैः ॥”
“वृषभिर्वर्षितृभिर्वराहैर्वराहारैः ।” इति तद्भाष्ये सायणः ॥)

वृषाकपायी, स्त्री, (वृषाकपेः विष्णोः शिवस्य अग्नेरिन्द्रस्य वा भार्य्या । वृषाकपि + “वृषाकप्यग्नीति ।” ४।१।३७। इति ङीप् । ऐकारादेशश्च ।) लक्ष्मीः । गौरी । इत्यमरः ॥ स्वाहा । इति भरतः ॥ शची । इति स्वामी ॥ (यथा, ऋग्वेदे ।१०।८६।१३।
“वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ।”
“हे वृषाकपायि कामानां वर्षकत्वादभीष्टदेशगमनाच्चेन्द्रो वृषाकपिस्तस्य पत्नि ।” इति तद्भाष्ये सायणः ॥) जीवन्ती । शतावरी । इति मेदिनी ॥

वृषाकपिः, पुं, (“वृषः कपिरस्येति । अन्येषामपीति दीर्घः ।” इति उणा० ४ । १४३ । इत्यस्य वृत्तौ उज्ज्वलदत्तः ।) विष्णुः । (यथा हरिवंशे । २१६ । ४७ ।
“ततो विभुः प्रवरवराहरूपधृक्
वृषाकपिः प्रसभमथैकदंष्ट्रया ॥”)
शिवः । (यथा, हरिवंशे । ३ । ५२ ।
“वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ॥”)
अग्निः । इति मेदिनी ॥ इन्द्रः । इति वृषाकपायीशब्दस्य शचीवाचकत्वदर्शनात् ॥ (यथा, भागवते । ६ । १३ । १० ।
“एवं सञ्चोदितो विप्रैर्मरुत्वानहनद्रिपुम् ।
ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥”
सूर्य्यः । यथा, महाभारते । ३ । ३ । ६१ ।
“त्वं हंसः सविता भानुरंशुमाली वृषाकपिः ॥”)

वृषाकरः, पुं. माषः । इति राजनिर्घण्टः ॥

वृषाङ्कः, पुं, (वृषोऽङ्कोऽस्य ।) शिवः । (यथा, भागवते । ८ । ८ । ३ ।
“पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः ॥”)
साधुः । भल्लातकः । षण्डः । इति मेदिनी ॥

वृषाङ्कजः, पुं, डमरुः । इति शब्दरत्नावली ॥

वृषाञ्चनः, पुं, (वृषेण अञ्चति गच्छतीति । अञ्चु-गतौ + ल्युः ।) शिवः । इति त्रिकाण्डशेषः ॥

वृषाणकः, पुं, शिवः । इति त्रिकाण्डशेषः ॥

वृषान्तकः, पुं, (वृषस्यासुरस्यान्तकः ।) विष्णुः । इति शब्दरत्नावली ॥

वृषायणः, पुं, चटकः । इति हारावली ॥ (वृषेण अयनं गमनं यस्य ।) शिवश्च ॥

वृषाहारः, पुं, (वृष उन्दूर आहारो यस्य ।) विड़ालः । इति हारावली ॥

वृषी, [न्] पुं, मयूरः । इति शब्दमाला ॥

वृषी, स्त्री, व्रतिनां कुशादिमयासनम् । इत्यमरः ॥ (यथा, देवीभागवते । ५ । ३२ । ३० ।
“शिष्यो ददौ वृषीं तस्मै गुरवा नोदित-
स्तदा ॥”)

वृषोत्सर्गः, पुं, (वृषस्योत्सर्गः ।) अशौचान्तद्वितीयदिनादिकर्त्तव्यत्रिशूलचक्राङ्कितवत्सतरीचतुष्टययुक्तवृषत्यागः । वृषाभावे तत्प्रतिनिधिर्यथा,—
“एकादशेऽह्नि सम्प्राप्ते वृषाभावो भवेद्यदि ।
दर्भैः पिष्टैस्तु संपाद्य तं वृषं मोचयेद्बुधः ॥
वृषोत्सर्ज्जनवेलायां वृषाभावः कथञ्चन ।
मृत्तिकाभिस्तु दर्भैर्व्वा वृषं कृत्वा विमोचयेत् ॥”
इति गारुड़े प्रेतकल्पे ६ अध्यायः ॥
तस्य विधिर्यथा । कालविवेकेऽप्यग्निपुराणम् ।
“एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः ।
प्रेतलोकं परित्यज्य स्वर्गलोकं स गच्छति ॥
आद्यश्राद्धे त्रिपक्षे वा षष्ठे मासि च वत्सरे ।
वृषोत्सर्गश्च कर्त्तव्यो यावन्न स्यात् सपिण्डता ।
सपिण्डीकरणादूर्द्ध्वं कालोऽन्यः शास्त्रचोदितः ॥”
यस्य प्रेतस्येति सामान्यतः श्रुतेः पितृभिन्नस्यापि वृषोत्सर्गः प्रतीयते ॥ * ॥ अथ वृषोत्सर्गं व्याख्यास्यामः । कार्त्तिक्यां पौर्णमास्यां रेवत्यामाश्वयुज्यां दशाहे गते संवत्सरेऽतीते वेति । अत्र मृततिथिमादाय संवत्सरगणना दशाहवदित्यविरोधः । एकादशाह इति आद्यश्राद्ध इति चाशौचान्ताद्वितीयदिनपरम् ।
“अशौचान्ताद्द्वितीयेऽह्नि शय्यां दद्याद्विलक्षणाम् ।
काञ्चनं पुरुषं तद्वत् फलवस्त्रसमन्वितम् ॥
संपूज्य द्विजदाम्पत्यं नानाभरणभूषणैः ।
वृषोत्सर्गश्च कर्त्तव्यो देया च कपिला शुभा ॥”
इति मत्स्यपुराणेनैकवाक्यत्वात् ॥
प्रेतवृषोत्सर्गे वृद्धिश्राद्धं न कर्त्तव्यम् ।